**ब्रेन इंटरनेशनल स्कूल**

**विषय - संस्कृत** **कक्षा** - दश **अभ्यास पत्र -अक्तूबर 2024**

**11 अधोलिखितम् अनुच्छेदम् पठित्वा प्रश्नानाम् उतराणि उतरपुस्तिकायाम् संस्कृतेन लिखत–**

द्रुमाः वसुन्धरायाः अलंकाराः सन्ति ये आजीवनं दूषितवायोः विषं पिबन्ति , प्राणिभ्यः च अमृततुल्यं शुद्धं वायुं उत्सृजन्ति। एते उपकारिणः स्वयं आतपे तिष्ठन्ति , ग्रीष्मतापेन तप्तेभ्यः श्रान्तेभ्यः च जनेभ्यः शीतलां छायां यच्छन्ति। भारतीय-संस्कृतौ वटवृक्षस्य , अश्वत्थतरोः , तुलसीपादपादीनां बहुमानः क्रियते। वटवृक्षस्य अधः उपविश्य गुरवः शिष्यान् उपविशन्ति स्म। विविधैः फलैः प्रसूनैः च अलंकृताः महीरुहाणां विनताः शाखाः मानवेभ्यः विनम्रतायाः आचरणस्य संदेशं यच्छन्ति। वृक्षाणां संगे मनुष्याः अतीव शान्तिं विन्दन्ति। मनुष्याणां स्नेहस्पर्शेन च पादपाः सम्यक्रूपेण विकसन्ति। अतः अस्माभिः समयं प्राप्य वृक्षैः सह प्रकृतिमातुः अंके अवश्यमेव स्थातव्यम्। असंख्यजीवजंतुनां आश्रयस्थलानि अनेकेषां खगानां नीडानि एते पुष्पिताः फलिनः च वृक्षाः स्थाने - स्थाने रोपणीयाः रक्षणीयाः वर्धनीयाः च।

**1 एकपदेन उत्तरत–**

1 वसुन्धरायाः अलंकाराः के सन्ति ?

2 द्रुमाः प्राणिभ्यः कीदृशं वायुं उत्सृजन्ति ?

**2 पूर्णवाक्येन उत्तरत–**

1 महीरुहाणां विनताः शाखाः मानवेभ्यः कस्य संदेशं यच्छन्ति ?

2 भारतीय-संस्कृतौ केषाम् बहुमानः क्रियते ?

**3 गद्यांशस्य उचितं शीर्षकं लिख -**

**4 प्रदत्तविकल्पेभ्यः शुद्धम् उत्तरम् चित्वा लिखत–**

1 अनुच्छेदे 'विकसन्ति' इति क्रियापदस्य कर्तृपदं किम् ?

1 मनुष्याणां 2 स्नेहस्पर्शेन 3 पादपाः 4 सम्यक्

2 'एते उपकारिणः' अत्र 'एते' सर्वनामपदम् केभ्यः प्रयुक्तम् ?

1 वृक्षेभ्यः 2 जनेभ्यः 3 श्रान्तेभ्यः 4 तप्तेभ्यः

3 'पुष्पैः' इति अर्थे किम् पदम् अत्र प्रयुक्तम् ?

1 फलैः 2 प्रसूनैः 3 वृक्षैः 4 विविधैः

**2 अधोलिखित वाक्यानां संस्कृतभाषायां अनुवादं कुरुत–**

**1** मार्ग के दोनों ओर वृक्ष हैं ।

**2** गंगा हिमालय से निकलती है।

**3** पक्षी पेड़ पर बैठे हैं ।

**4** सरला और विमला विद्यालय जाती हैं।

**5** बालक उद्यान में खेलते हैं।

3 **भवान् गौरवः अस्ति। भवतः मित्रम् मयकः नवमकक्षाया प्रविष्टम्। स्वमित्रम् नवमकक्षायां संस्कृतम् पठितुम् प्रेरयितुम् लिखिते अस्मिन् पत्रे रिक्तस्थानानि पूरयित्वा उत्तरपुस्तिकायां लिखत।**

प्रिय मयंक,

...............1..............


अत्र कुशलं ...............2............। तव पत्रात् ज्ञातं यत् त्वं नवमकक्षायां संस्कृतं पठितुं इच्छसि।एतत् ज्ञात्वा अहम् अति प्रसन्नः ............3...........। यतः संस्कृतं पठित्वा वयं स्वदेशस्य गौरवं अनुभवितुम् ...........4..........। इयं देवभाषा विश्वस्य सर्वासु ...........5......... प्राचीनतमा वैज्ञानिकी च अस्ति। विश्वस्य ............6............ भाषासु भारतीयभाषासु च ...... .............7............. शब्दाः प्राप्यन्ते। किम् त्वं जानासि यत् वेदाः, रामायणं, महाभरतम्, उपनिषदः, पंचतन्त्रहितोपदेशादयः .............8............ संस्कृते एव लिखिताः सन्ति। अतः त्वं सर्वैः .............9........... सह संस्कृतमपि परिश्रमेण पठ। अवकाशेषु मम गृहम् आगच्छ। मातापितृभ्याम् मम प्रणामान् कथय।

तव ...............10..............

गौरवः

| | | | | | | |
|---|---|---|---|---|---|---|
| 1भाषासु | 2 अभवम् | 3 नमो नमः | 4 मित्रम् | 5 तत्रास्तु | 6 शक्नुमः | 7 विषयैः |
| 8 संस्कृतस्य | 9 अनेकासु | 10 ग्रन्थाः | | | | |

4 **चित्रं दृष्ट्वा मञ्जूषातः पदानि अवचित्य संस्कृते पञ्चवाक्यानि लिखत–**



| |
|---|
| सरोवरः, मीनाः, भ्रमराः, कमलानि, नौकाः, गुंजति, विकसन्ति, वृक्षाः, तरन्ति, शोभन्ते, तटे, चलन्ति। |